श्री भविष्योत्तरपुराणे श्री कृष्णयुधिष्ठिर संवादे

!! श्री शालिग्रामस्तोत्रम् !!

अस्य श्रीशालिग्रामस्तोत्र महामन्त्रस्य , श्रीभगवान् ऋषिः,

नारायणो देवता, अनुष्टुप् छन्दः, श्रीशालिग्रामस्तोत्रमन्त्र

जपे निवियोगः !!

युधिष्ठिर उवाच ---

श्री देव देव देवेश देवतार्चनमुत्तमम् !

तत्सर्वं श्रोतुमिच्छामि ब्रूहि मे पुरुषोत्तम !! 1

श्री भगवानुवाच ---

गण्डक्यां चोत्तरे तीरे गिरिराजस्य दक्षिणे !

दशयोजनविस्तीर्णा महाक्षेत्र वसुन्धरा !! 2

शालिग्रामो भवेद्देवो देवी द्वारावती भवेत् !

उभयोस्सङ्गमो यत्र मुक्तिस्तत्र न संशयः !! 3

शालिग्रामशिला यत्र यत्र द्वारावति शिला !

उभयोस्सङ्गमो यत्र मुक्तिस्तत्र न संशयः !! 4

आजन्मकृत पापानां प्रायश्चित्तं य इच्छति !

शालिग्रामशिलावारि पापहारी नमोऽ स्तु ते !! 5

अकाल मृत्युहरणं सर्वव्याधि विनाशनम् !

विष्णोः पादोदकं पीत्वा शिरसा धारयाम्यहम् !! 6

शङ्ख मध्ये स्थितं तोयं भ्रामितं शिरसोपरि !

अङ्गलग्नं मनुष्याणां ब्रह्महत्यादिकं दहेत् !! 7

स्नानोदकं पिबेन्नित्यं चक्राङ्कित शिलोद्भवम् !

प्रक्षाल्यं इति तत्तोयं ब्रह्महत्यां व्यपोहति !! 8

अग्निष्टोम सहस्राणि वाजपेय शतानि च !

सम्यक् फलमवाप्नोति विष्णोर्नैवेद्य भक्षणात् !! 9

नैवेद्ययुक्तां तुलसीं च मिश्रितां

विशेषतः पादजलेन विष्णोः !

योऽश्नाति नित्यं पुरतो मुरारेः

प्राप्नोति यज्ञायुत कोटि पुण्यम् !! 10

खण्डिता स्फुटिता भिन्ना अग्निदग्धास्तथैव च !

शालिग्रामशिला यत्र तत्र दोषो न विद्यते !! 11

न मन्त्रः पूजनं नैव न तीर्थं न च भावना !

न स्तुतिर्नोपचारश्च शालिग्राम शिलार्चने !! 12

ब्रह्महत्यादिकं पापं मनोवाक्काय संभवम् !

शीघ्रं नश्यति तत्सर्वं शालिग्राम शिलार्चनात् !! 13

नानावर्णमयं चैव नानाभोगेन वेष्टितम् !

तथा वरप्रसादेन लक्ष्मीकान्तं वदाम्यहम् !! 14

नारायणोद्भवो देवः चक्रमध्ये च कर्मणा !

तथा वरप्रसादेन लक्ष्मीकान्तं वदाम्यहम् !! 15

कृष्णे शिलातले यत्र सूक्ष्मं चक्रं च दृश्यते !

सौभाग्यं सन्ततिं धत्ते सर्वसौख्यं ददाति च !! 16

वासुदेवस्य चिन्हानि दृष्ट्वा पापैः प्रमुच्यते !

श्रिधरस्सुकरे वामे हरिद्वर्णस्तु दृश्यते !! 17

वाराह रूपिणं देवं कूर्माङ्गैरपि चिन्हितम् !

गोपदं तत्र दृश्येत वाराहं वामनं तथा !! 18

पीतवर्णस्तु देवानां रक्तवर्णं भयावहम् !

नारसिंहो भवेद्देवो मोक्षदं च प्रकीर्तितम् !! 19

शङ्खचक्रगदाकूर्माः शङ्खो यत्र प्रदृश्यते !

शङ्खवर्णस्य देवानां वामे देवस्य लक्षणम् !! 20

दामोदरं तथा स्थूलं मध्ये चक्रे प्रतिष्ठितम् !

पूर्णद्वारेण सङ्कीर्णा पीतरेखा च दृश्यते !! 21

छत्राकारे भवेद्राज्यं वर्तुले च महाश्रियः !

चपटे च महादुःखं शूलाग्रे तु रणं ध्रुवम् !! 22

ललाटे शेषभोगस्तु शिरोपरि सुकाञ्चनम् !

चक्रकाञ्चन वर्णानां वामदेवस्य लक्षणम् !! 23

वामपार्श्वे च वै चक्रे कृष्णवर्णस्तु पिङ्गलम् !

लक्ष्मीनृसिंह देवानां पृथग्वर्णस्तु दृश्यते !! 24

लम्बोष्ठे च दरिद्रं स्यात् पिङ्गले हानिरेव च !

लग्नचक्रे भवेत् व्याधिः विदारे मरणं ध्रुवम् !! 25

पादोदकं च निर्माल्यं मस्तके धारयेत्सदा !

विष्णोर्दृष्टं भक्षितव्यं तुलसीदलमिश्रितम् !! 26

कल्पकोटि सहस्राणि वैकुण्ठे वसते सदा !

शालिग्रामशिला बिन्दुः हत्याकोटि विनाशनः !! 27

तस्मात्संपूजयेत् ध्यात्वा पूजितं चापि सर्वदा !

शालिग्रामशिला स्तोत्रं यः पठेच्च द्विजोत्तमः !! 28

स गच्छेत्परमं स्थानं यत्र लोकेश्वरो हरिः !

सर्वपाप विनिर्मुक्तो विष्णुलोकं स गच्छति !! 29

दशावतारो देवानां पृथग्वर्णस्तु दृश्यते !

ईप्सितं लभते राज्यं विष्णु पूजामनुक्रमात् !! 30

कोट्यो हि ब्रह्महत्यानां अगम्यागम्यकोटयः !

तास्सर्वा नाशमायान्ति विष्णु नैवेद्य भक्षणात् !! 31

विष्णोः पादोदकं पीत्वा कोटिजन्माघनाशनम् !

तस्मादष्टगुणं पापं भूमौ बिन्दुनिपातनात् !! 32

!! इति श्रिशालिग्रामस्तोत्रं संपूर्णम् !!

!! श्रीरङ्गनाथाष्टकम् !!

आनन्दरूपे निजबोधरूपे ब्रह्मस्वरूपे श्रुतिमूर्तिरूपे !

शशाङ्करूपे रमणीयरूपे श्रीरङ्गरूपे रमतां मनो मे !! 1

कावेरितीरे करुणा विलोले मन्दारमूले धृतचारुकेले !

दैयान्तकालेऽ खिल लोकलीले श्रीरङ्गलीले रमतां मनो मे !! 2

लक्ष्मीनिवासे जगतां निवासे हृत्पद्मवासे रविबिम्बवासे !

कृपानिवासे गुणवृन्दवासे श्रीरङ्गवासे रमतां मनो मे !! 3

ब्रह्मादिवन्द्ये जगदेकवन्द्ये मुकुन्दवन्द्ये सुरनाथवन्द्ये !

व्यासादिवन्द्ये सनकादिवन्द्ये श्रीरङ्गवन्द्ये रमतां मनो मे !! 4

ब्रह्मादिराजे गरुडादिराजे वैकुण्ठराजे सुरराजराजे !

त्रैलोक्यराजेऽ खिल लोकराजे श्रीरङ्गराजे रमतां मनो मे !! 5

अमोघमुद्रे परिपूर्णनिद्रे श्रीयोगनिद्रे ससमुद्रनिद्रे !

श्रितैकभद्रे जगदेकनिद्रे श्रीरङ्गभद्रे रमतां मनो मे !! 6

सचित्रशायी भुजगेन्द्रशायी नन्दाङ्गशायी कमलाङ्गशायी !

क्षीराब्धिशायी वटपत्रशायी श्रीरङ्गशायी रमतां मनो मे !! 7

इदं हि रङ्गं त्यजामिहाङ्गं पुनर्नशाङ्गं यदि शाङ्गमेति !

पाणौ रथाङ्गं चरणेषु काङ्गं याने विहङ्गं शयने भुजङ्गम् !! 8

रङ्गनाथाष्टकं पुण्यं प्रातरुत्थाय यः पठेत् !

सर्वान् कामानवाप्नोति रङ्गिसायुज्यमाप्नुयात् !! 9

!! इति श्रिरङ्गनाथाष्टकम् समाप्तम् !!

!! श्रि अच्युताष्टकम् !!

अच्युतं केशवं रामनारायणं कृष्ण दामोदरं वासुदेवं हरिम् !

श्रीधरं माधवं गोपिकावल्लभं जानकीनायकं रामचन्द्रं भजे !! 1

अच्युतं केशवं सत्यभामाधवं माधवं श्रीधरं राधिकाराधितम् !

इन्दिरामन्दिरं चेतसा सुन्दरं देवकिनन्दनं नन्दजं संदधे !! 2

विष्णवे जिष्णवे शङ्खिने चक्रिणे रुक्मिणीरागिणे जनकीजानये !

वल्लवी वल्लभायाऽ र्चितायात्मने कंसविध्वंसिने वंशिने ते नमः !! 3

कृष्ण गोविन्द हे रामनारायण श्रीपते वासुदेवाजित श्रिनिधे !

अच्युतानन्त हे माधवाधोक्षज द्वारकानायक द्रौपदीरक्षक !! 4

राक्षसक्षोभितः सीतयाशोभितो दण्डकारण्यभूपुण्यता कारणः !

लक्ष्मणेनान्वितो वानरैः सेवितोऽ गस्त्यसंपूजितो राघवः पातु माम् 5

धेनुकारिष्टकानिष्टकृद् द्वेषिणां केशिहा कंसहृद्वंशिकावादकः !

पूतनाकोपकः सूरजाखेलनो बालगोपालकः पातु मां सर्वदा !! 6

विद्युदुद्योतवत् प्रस्फुरद् वाससं प्रावृडंभोदवत् प्रोल्लसत् विग्रहम् !

वन्यया मालया शोभितोरस्थलं लोहितान्घ्रिद्वयं वारिजाक्षं भजे !! 7

कुञ्चितैः कुन्तलैर्भ्राजमाननं रत्नमौलिं लसत्कुण्डलं गण्डयोः !

हारकेयूरं कङ्कणप्रोज्ज्वलं किङ्किणीमञ्जुलं श्यामलं तं भजे !! 8

अच्युताष्टकं यः पठेत् इष्टदं प्रेमतः प्रत्यहं पूरुषः सस्पृहम् !

वृत्ततः सुन्दरं कर्तृ विश्वंभरं तस्य वश्यो हरिर्जायते सत्वरम् !! 9

!! इति अच्युताष्टकं समाप्तम् !!

## श्रीहनूमत्कवच स्तोत्र

अस्य श्रीहनूमत्कवच स्तोत्र महामन्त्रस्य ! श्री रामचन्द्र ऋषिः !
गायत्री छन्दः ! श्रीहनूमान परमात्मा देवता ! मारुतात्मज इति बीजम् !
अञ्जनासूनुरिति शक्तिः ! श्रीरामदूत इति कीलकम् !
मम मानसभीष्टसिद्ध्यर्थे जपे विनियोगः !!

श्रीरामचन्द्र उवाच --

हनूमान् पूर्वतः पातु दक्षिणे पवनात्मजः !

प्रतीच्यां पातु रक्षघ्नो सौम्यां सागरतारणः !! 1

ऊर्ध्वं मे केसरी पातु विष्णुभक्तस्तु मे ह्यधः !

लङ्काविदाहकः पातु सर्वापद्भ्यो निरन्तरम् !! 2

सुग्रीवसचिवः पातु मस्तके वायुनन्दनः !

फालं पातु महावीरः भ्रुवोर्मध्ये निरन्तरम् !! 3

नेत्रे छायापहारी च पातु मां प्लवगेश्वरः !

कपोलौ कर्णमूले तु पातु मे रामकिङ्करः !! 4

नासायामञ्जनासूनुः पातु वक्त्रं हरीश्वरः !

पातु कण्ठं च दैत्यारिः स्कन्धौ पातु सुरार्चितः !! 5

भुजौ पातु महातेजाः करौ तु चरणायुधः !

नखान नखायुधः पातु कुक्षौ पातु कपीश्वरः !! 6

वक्षो मुद्रापहारी च पातु पार्श्वे महाभुजः !

सीताशोकप्रहर्ता च स्तनौ पातु निरन्तरम् !! 7

लङ्काभयङ्करः पातु पृष्टदेशे निरन्तरम् !

नाभिं श्रीरामदासो मे कटिं पातु समीरजः !! 8

गुह्यं पातु महाप्राज्ञः सक्थिनी च शिवप्रियः !

ऊरू च जानुनी पातु लङ्काप्रासाद भञ्जनः !! 9

जङ्घे पातु कपिश्रेष्ठः गुल्फं पातु महाबलः !

अचलोद्धारकः पातु पादौ भास्कर सन्निभः !! 10

अङ्गान्यमित सत्व आढ्यः पातु पादाङ्गुलीस्सदा !

सर्वाङ्गानि महाशूरः पातु रोमाणि चात्मवान् !! 11

हनूमत्कवचं यस्तु पठेत् विद्वान् विचक्षणः !

स एव पुरुषश्रेष्ठः भुक्तिं मुक्तिं च विन्दति !! 12

त्रिकालं एककालं वा पठेत् मासत्रयं नरः !

सर्वान रिपून क्षणात्जित्वा स पुमान श्रियमाप्नुयात !! 13

अर्धरात्रौ जले स्थित्वा सप्तवारं पठेत् यदि !

क्षयापस्मारकुष्ठादि तापत्रय निवारणम् !! 14

अस्वत्थमूलेऽर्कवारे स्थित्वा पठति यः पुमान् !

अचलां श्रियमाप्नोति सङ्ग्रामे विजयी भवेत् !! 15

सर्वरोगाः क्षयं यान्ति सर्वसिद्धि प्रदायकम् !

यः करे धारयेन्नित्यं रामरक्षा समन्वितम् !! 16

रामरक्षां पठेद्यस्तु हनूमत्कवचं विना !

अरण्ये रुदितं तेन स्तोत्र पाठञ्च निष्फलम् ! 17

सर्वदुःखभयं नास्ति सर्वत्र विजयी भवेत् !

अहोरात्रं पठेद्यस्तु शुचिः प्रयतमानसः !! 18

मुच्यते नात्र संदेहः कारगृहगतो नरः !

पापोपपातकान्मर्त्यः मुच्यते नात्र संशयः !! 19

यो वारान्निधिमल्पपल्वलमिवोल्लङ्घ्य प्रतापान्वितः

वैदेही हीघनशोकतापहरणो वैकुण्ठ भक्तिप्रियः !

अक्षघ्नो जितराक्षसेश्वर महा दर्पापहारी रणे

सोऽ यं वानरपुङ्गवोऽ वतु सदा त्वस्मान् समीरात्मजः !! 20

!! इति श्रीआञ्जनेय कवचम् संपूर्णम् !!

!! श्री बालमुकुन्दाष्टकम् !!

करारविन्देन पदारविन्दं मुखारविन्दे विनिवेशयन्तम् !

वटस्य पत्रस्य पुटे शयानं बालं मुकुन्दं मनसा स्मरामि !! 1

संहृत्य लोकान् वटपत्रमध्ये शयानमाद्यन्तविहीनरूपम् !

सर्वेश्वरं सर्वहितावतारं बालं मुकुन्दं मनसा स्मरामि !! 2

इन्दीवरश्यामल कोमलाङ्गं इन्द्रादि देवार्चित पादपद्मम् !

सन्तान कल्पद्रुममाश्रितानां बालं मुकुन्दं मनसा स्मरामि !! 3

लम्बालकं लम्बितहारयष्टिं श्रुङ्गारलीलाङ्कितदन्तपङ्क्तिम् !

बिम्बादरं चारुविशालनेत्रं बालं मुकुन्दं मनसा स्मरामि !! 4

शिक्येन निधायाद्य पयोदधीनि बहिर्गतायां व्रजनायिकायाम् !

भुक्त्वा यथेष्टं कपटेन सुप्तं बालं मुकुन्दं मनसा स्मरामि !! 5

कालिन्दजान्तस्थित कालियस्य फणाग्ररङ्गे नटनप्रियन्तम् !

तत्पुच्छहस्तं शरदिन्दुवक्त्रं बालं मुकुन्दं मनसा स्मरामि !! 6

ऊलूखले बद्धमुदारशौर्यं उत्तुङ्गयुग्मार्जुन भङ्गलीलम् !

उत्फुल्लपद्मायत चारुनेत्रं बालं मुकुन्दं मनसा स्मरामि !! 7

आलोक्य मातुर्मुखमादरेण स्तन्यं पिबन्तं सरसिरुहाक्षम् !

सच्चिन्मयं देवमन्तरूपं बालं मुकुन्दं मनसा स्मरामि !! 8

!! इति श्रीबालमुकुन्दाष्टकम् समाप्तम् !!

!! यन्त्रोध्दारक हनूमत्स्तोत्रम् !!

( श्री व्यासरजयति विरचितम् )

नमामि दूतं रामस्य सुखदं च सुरद्रुमम् !

पीनवृत्तमहाबाहुं सर्वशत्रु निवारणम् !! 1

नानारत्न समायुक्तं कुण्डलादि विराजितम् !

सर्वदाऽभीष्ट दातारं सतां वै दृढमाहवे !! 2

वासिनं चक्रतीर्थस्य दक्षिणस्थगिरौ सदा !

तुङ्गाम्भोधितरङ्गस्य वातेन परिशोभते !! 3

नानादेशाऽगतैः सद्भिः सेव्यमानं नृपोत्तमैः !

धूपदीपादिनैवेद्यैः पञ्चखाद्यैश्च भक्तितः !! 4

व्रजामि श्रीहनूमन्तं हेमकान्तिसमप्रभम् !

व्यासतीर्थ यतीन्द्रेण पूजितं च विधानतः !! 5

त्रिवारं यः पठेन्नित्यं स्तोत्रं भक्त्या द्विजोत्तमः !

वाञ्छितं लभतेऽभीष्टं षण्मासाभ्यन्तरे खलु !! 6

पुत्रार्थी लभते पुत्रं यशोऽर्थी लभते यशः !

विद्यार्थी लभते विद्यां धनार्थी धनमाप्नुयात् !! 7

सर्वथा माऽस्तु संदेहो हरिः साक्षात् जगत्पतिः !

यः करोत्यत्र संदेहं स याति नरकं ध्रुवम् !! 8

!! इति श्री व्यासराजयति विरचितं यन्त्रोद्धारक

हनूमत्स्तोत्रम् संपूर्णम् !!

!! श्रीगणेश प्रातस्मरण स्तोत्रम् !!

प्रातः स्मरामि गणनाथमनाथबन्धुं

सिन्दूरपूर्ण परिशोभित गण्डयुग्मम् !

उद्दण्डविघ्न परिखण्डन चण्डदण्डं

आखण्डलादि सुरनायक बृन्दवन्द्यम् !! 1

प्रातर्नमामि चतुराननवन्द्यमानं

इच्छानुकूलमखिलं च वरं ददानम् !

तं तुन्दिलं द्विरसनाधिप यज्ञसूत्रं

पुत्रं विलासचतुरं शिवयोः शिवाय !! 2

प्रातर्भजामि अभयदं निजभक्तशोक-

दावानलं सुरवरं वरकुञ्जरास्यम् !

अज्ञानकानन विनाशन हव्यवाहं

उत्साहवर्धनमहं सुतमीश्वरस्य !! 3

श्लोकत्रयमिदं पुण्यं यः पठेत् प्रयतः पुमान !

प्रातरुत्थाय सततं स साम्राज्यमवाप्नुयात् !! 4

!! इति श्रीगणेशप्रातस्मरणस्तोत्रम् संपूर्णम् !!

!! श्रीरामचतुःश्लोकी !!

!! श्री सीता लक्ष्मण भरत शत्रुघ्न हनूमत्समेत

श्रीरामचन्द्र स्वामिने नमः !!

रामः कौशिकमन्वगात्पथि मुनेर्वाचाऽ वधीत्ताटकां

सत्रं तस्य ररक्ष तेन कथिताः शुश्राव तास्ताः कथाः !

गत्वाऽ थो मिथिलां विधाय दृषदं योषिन्मणिं सन्मुनेः

भङ्क्त्वा धूर्जटिचापमाप रमणीं सीताभिधानामपि !! 1

सीतायाः करलालनेन स कृति जित्वा मुनिं भार्गवं

साकेतं तरसा प्रविश्य जननीं आनन्दयन्मध्यमाम् !

आसिद्यो विपिने चतुर्दश समा रक्षन्मुनीनानतान्

रक्षः सङ्घमथावधीदघटयद्राज्यं च सूर्यात्मजे !! 2

वायोरात्मभुवा ततो हनुमता पाथोधिपारस्थितां

प्राणेभ्योऽ पि गरीयसीं प्रियतमां विज्ञाय रक्षोहृताम् !

सेतुं वारिनिधौ विधाय विविधानन्ताघविध्वंसनं

लङ्कायां विलुलाव रावणशिरोबृन्दानि वन्देय तम् !! 3

आरुह्याथ विभीषणेन शुभगं भक्त्या समावेदितं

मान्यं पुष्पकमञ्जसा निजपुरिं आगत्य मित्रैर्वृतः !

आनन्दाय वसिष्ठ काश्यपमुखैः पट्टाभिषिक्तो विभुः

तस्मिन् जाग्रति जानकीप्रियतमे को नाम भीतिर्मम !! 4

धनुष्कर चतुःश्लोकी धनुष्पुर कवीरिता !

मारीकातर चित्तानां मारीति मितरा दिशेत् !

सर्वदा कुर्वतां चित्ते सर्वदा भातु सन्मता !!

!! इति श्रीरामचतुःश्लोकी समाप्ता !!

!! श्री रुणमोचन मङ्गलस्तोत्रम् !!

!! (एकविंशति नामानि) !!

मङ्गलो भूमिपुत्रश्च रुणहर्ता धनप्रदः !

स्थिरासनो महाकायः सर्वकर्मावरोधकः !! 1

लोहितो लोहिताक्षश्च सामगानां कृपाकरः !

धरात्मजः कुजो भौमो भूतिदो भूमिनन्दनः !! 2

अङ्गारको यमश्चैव सर्वरोगापहारकः !

वृष्टेः कर्तापहर्ता च सर्वकामफलप्रदः !! 3

अङ्गारक महीपुत्र भगवन् भक्तवत्सल !

नमस्तेऽ स्तु महाभाग रुणमाशु विनाशय !! 4

पुत्रान देहि धनं देहि त्वामस्मि शरणं गतः !

रुणदारिद्यदुःखेन शत्रूणां च भयात्ततः !! 5

!! इति श्री रुणमोचनमङ्गल स्तोत्रं संपूर्णम् !!

!! उपदेशपञ्चकम् !!

वेदो नित्यमधीयतां तदुदितं कर्म स्वनुष्ठीयतां

तेनेशस्य विधीयतां अपचितिः काम्ये मतिस्त्यज्यताम् !

पापौघः परिधूयतां भवसुखे दोषोऽ नुसन्धीयतां

आत्मेच्छा व्यवसीयतां निजगृहात् तूर्णं विनिर्गम्यताम् !! 1

सङ्गः सत्सु विधीयतां भगवतो भक्तिर्तृढाधीयतां

शान्त्यादिः परिचीयतां दृढतरं कर्माशु संत्यज्यताम् !

सद्बिद्वानुपसृप्यतां प्रतिदिनं तत्पादुका सेव्यतां

ब्रह्मैकाक्षरमर्थ्यतां श्रुतिशिरोवाक्यं समाकर्ण्यताम् !! 2

वाक्यार्थश्च विचार्यतां श्रुतिशिरः पक्षः समाश्रीयतां

दुस्तर्कात् सुविरम्यतां श्रुतिमतः तर्कोऽ नुसन्धीयताम् !

ब्रह्मास्मींति विभाव्यतां अहरहः गर्वः परित्यज्यतां

देहेऽ हंमतिरुज्झ्यातां बुधजनैः वादः परित्यज्यताम् !! 3

क्षुद्व्याधिश्च चिकित्स्यतां प्रतिदिनं भीक्षौषधं भुज्यतां

स्वाद्वन्नं न तु याच्यतां विधिवशात् प्राप्तेन सन्तुष्यताम् !

शितोष्णादि विषह्यतां न तु वृथा वाक्यं समुच्चार्यतां

औदासीन्यमभीप्स्यतां जनकृपानैष्ठुर्यमुत्सृज्यताम् !! 4

एकान्ते सुखमास्यतां परतरे चेतः समाधीयतां

पूर्णात्मा सुसमीक्ष्यतां जगदिदं तद्बाधितं दृश्यताम् !

प्राक्कर्म प्रविलाप्यतां चितिबलान्नाप्युत्तरैः श्लिष्यतां

प्रारब्धं त्विह भुज्यतां अथ पर ब्रह्मात्मना स्थीयताम् !! 5

!! इति उपदेशपञ्चकम् !!

!! श्रीरङ्गनाथ स्तोत्रम् !!

नमः श्रीरङ्गनाथाय नमः श्रीरङ्गशायिने !

नमः श्रीरङ्गदेवाय श्रीनिवासाय ते नमः !! 1

नमो भगवते तुभ्यं वासुदेवाय ते नमः !

सङ्कर्षणाय प्रद्युम्नाय अनिरुद्धाय ते नमः !! 2

पुरुषाय नमस्तुभ्यं अच्युताय पराय च !

वासुदेवाय ताराय नमः श्रीरङ्गशायिने !! 3

केशवाय नमस्तेऽ स्तु नमो नारायणाय च !

माधवाय नमस्तुभ्यं गोविन्दाय च ते नमः !! 4

ॐ नमो विष्णवे देव मधुसूदन ते नमः !

त्रिविक्रम नमस्तेऽ स्तु नमस्ते वामनाय च !! 5

श्रीधराय नमस्तुभ्यं ऋषिकेश नमोऽ स्तु ते !

नमोऽ स्तु पद्मनाभाय नमो दामोदराय च !! 6

मत्स्यकूर्म वराहाय हंसाश्वशिरसे नमः !

नमोऽ स्तु जामदग्नाय दत्ताय कपिलाय च !! 7

वेदव्यासाय बुद्धाय नृसिंहाय ते नमः !

रामलक्ष्मणशत्रुघ्न भरतात्मन् नमोऽ स्तु ते !! 8

कृष्णाय बलभद्राय नमस्सांभाय कल्किने !

अनन्तानन्दशयने पुराण पुरुषोत्तम !

रङ्गनाथ जगन्नाथ नाथ तुभ्यं नमो नमः !! 9

!! इति श्रीरङ्गनाथ स्तोत्रं संपूर्णम् !!

!! श्री तुलसी स्तोत्रम् !!

पापानि यानि रविसूनुपटस्थितानि गोब्राह्मपालपितृमातृवधादिकानि !

नश्यन्ति तानि तुलसीवन दर्शनेन गोकोटिदानसदृशं फलमाप्नुवन्ति !! 1

पुष्कराद्यानि तीर्थानि गङ्गाद्याः सरितस्तथा !

वासुदेवादयो देवाः वसन्ति तुलसीवने !! 2

तुलसीकाननं यत्र यत्र पद्मवनानि च !

वसन्ति वैष्णवाः यत्र तत्र सन्निहितो हरिः !! 3

यन्मूले सर्वतीर्थानि यन्मध्ये सर्वदेवताः !

यदग्रे सर्ववेदाश्च तुलसी त्वां नमाम्यहम् !! 4

तुलसी श्रीसखि शुभे पापहारिणी पुण्यदे !

नमस्ते नारदनुते नारायणमनःप्रिये !! 5

राजद्वारे सभामध्ये सङ्ग्रामे शत्रुपीडने !

तुलसीस्मरणं कुर्यात् सर्वत्र विजयी भवेत् !! 6

तुलस्यमृतजन्मासि सदा त्वं केशवप्रिये !

केशवार्थं चिनोमि त्वां वरदा भव शोभने !! 7

मोक्षैकहेतोर्धरणीधरस्य विष्णोस्समस्तस्य गुरोः प्रियस्य !

आराधनार्थं पुरुषोत्तमस्य छिन्दे दलं ते तुलसी क्षमस्व !! 8

कृष्यारम्भे तथा पुण्ये विवाहे चार्थसंग्रहे !

सर्वकार्येषु सिद्ध्यर्थं प्रस्थाने तुलसीं स्मरेत् !! 9

यः स्मरेत तुलसीं सीतां रामं सौमित्रिणा सह !

विनिर्जित्य रिपून् सर्वान् पुनरायाति कार्यकृत् !! 10

यादृष्टा निखिलाघसङ्गशमनी स्पृष्टा वपुः पावनी

रोगाणां अभिवन्दिता निरसनी सिक्तान्तकत्रासिनी !

प्रत्यासत्ति विधायिनी भगवतः कृष्णस्य संरोपिता

न्यस्ता तच्चरणे विमुक्तिफलदा तस्यै तुलस्यै नमः !! 11

खादन् मांसं पिबन्मद्यं सङ्गच्छन्नन्त्यजातिभिः !

सद्यो भवति पूतात्मा कर्णयोस्तुलसी धृता !! 12

चतुः कर्णे मुखे चैकं नाभावेकं तथैव च !

शिरस्येकं तथा प्रोक्तं तीर्थे त्रयमुदाहृतम् !! 13

अन्नोपरि तथा पञ्च भोजनान्ते दलत्रयम् !

एवं श्रीतुलसी ग्राह्या दशधा मङ्गलप्रदा !! 14

!! इति श्रीतुलसीस्तोत्रम् संपूर्णम् !!

!! तारतम्यस्तोत्रम् !!

विष्णुः सर्वोत्तमोऽ थ प्रकृतिरथ विधिप्राणनाथावथोक्ते

ब्रह्माणी भारती च द्विजफणिपमृडाश्च स्त्रियः षट् च विष्णोः !

सौपर्णी वारुणी पर्वतपतितनया चेन्द्रकामावथास्मान्

प्राणोऽ थो योऽ निरुध्दो रतिमनुगुरवो दक्षशच्यौ च पान्तु !! 1

त्रायन्तां नः सदैते प्रवह उत यमो मानवी चन्द्रसूर्यौ

चाप्पोऽ थो नारदोऽ थो भृगुरनलकुलेन्द्रः प्रसूतिश्च नित्यम् !

विश्वामित्रो मरीचि प्रमुखविधिसुताः सप्तवैवस्वताख्यः

चेवं वै मित्रतारे वरनिर्ऋतिनामा प्रावही च प्रसन्नाः !! 2

विष्वक्सेनोऽ श्विनौ तौ गणपति धनपावुक्तशेषाः शतस्थाः

देवाश्चोक्तेतरे ये तदवरमनवश्च्यावनो चथ्यसंज्ञौ !

वेन्यो यः कार्तवीर्यः क्षितिपति शशबिन्दु प्रियादिव्रतोऽ थो

गङ्गा पर्जन्यसंज्ञे शशियमदयिते मा विराट् चाशु पान्तु !! 3

एभ्योऽ न्ये चाग्निजाया च जलमयबुधश्चापि नामात्मिकोषा

चैवं भूमौ ततात्मा शनिरपि कथितः पुष्करः कर्मपोपि !

येऽ थाथो चाप्युतानं इह कथितसुरा मध्यभागे समास्ते

विष्ण्वाद्या न पुनन्तु क्रमगदित महा तारतम्येन युक्ताः !! 4

वन्दे विष्णुं नमामि श्रियमथ च भुवं ब्रह्मवायु च वन्दे

गायत्रीं भारतीं तां अपि गरुडमनन्तं भजे रुद्रदेवम् !

देवीं वन्दे सुपर्णीं अहिपतिदयितां वारुणीमप्युमां तां

इन्द्रादीन् काममुख्यान् अपि सकलसुरान् तद्गुरून् मद्गुरूंश्च !! 5

!! इति श्रीकल्याणीदेवी विरचितं तारतम्यस्तोत्रं संपूर्णम् !!

!! श्रीललितापञ्चरत्नम् !!

प्रातः स्मरामि ललिता वदनारविन्दं

बिम्बाधरं पृथुलमौक्तिकशोभिनाशम् !

आकर्णदीर्घनयनं मणिकुण्डलाढ_यं

मन्दस्मितं मृगमदोज्ज्वलफालदेशम् !! 1

प्रातर्भजामि ललिताभुजकल्पवल्लीं

रत्नाङ्गुलीय लसदङ्गुलि पल्लवाढ_याम् !

माणिक्य हेमवलयाङ्गद शोभमानां

पुण्ड्रेक्षु चापकुसुमेषु सृणीर्दधानाम् !! 2

प्रातर्नमामि ललिता चरणारविन्दं

भक्तेष्ट दाननिरतं भवसिन्धुपोतम् !

पद्मासनादि सुरनायक पूजनीयं

पद्माङ्कुशध्वज सुदर्शन लाञ्छनाढ_यम् !! 3

प्रातः स्तुवे परशिवां ललितां भवानीं

त्रैयन्त वेद्यविभवां करुणानवद्याम् !

विश्वस्य सृष्टि विलयस्थिति हेतुभूतां

विद्येश्वरीं निगमवाङ्गमनसातिदूराम् !! 4

प्रातर्वदामि ललिते तव पुण्यनाम

कामेश्वरीति कमलेति महेश्वरीति !

श्रीशाम्भवीति जगतां जननी परेति

वाग्देवतेति वचसा त्रिपुरेश्वरीति !! 5

यः श्लोकपञ्चकमिदं ललिताम्बिकायाः

सौभाग्यदं सुललितं पठति प्रभाते !

तस्मै ददाति ललिता झटिति प्रसन्ना

विद्यां श्रियं विपुल सौख्यमनन्तकीर्तिम् !! 6

!! इति श्रीललितापञ्चरत्नम् !!

!! अथ रामाष्टकम् !!

सुग्रीवमित्रं परमं पवित्रं सीताकलत्रं नवमेघगात्रम् !

कारुण्यपात्रं शतपत्रनेत्रं श्रीरामचन्द्रं सततं नमामि !! 1

संसारसारं निगमप्रचारं धर्मावतारं हृतभूमिभारम् !

सदाऽ विकारं सुखसिन्धुसारं श्रीरामचन्द्रं सततं नमामि !! 2

लक्ष्मीनिवासं जगतांनिवासं लङ्काविनाशं भुवनप्रकाशम् !

भूदेववासं शरदिन्दुहासं श्रीरामचन्द्रं सततं नमामि !! 3

मन्दारमालं वचने रसालं गुणैर्विशालं हतसप्ततालम् !

क्रव्यादकालं सुरलोकपालं श्रीरामचन्द्रं सततं नमामि !! 4

वेदान्तगानं सकलैः समानं हृतारिमानं त्रिदशप्रधानम् !

गजेन्द्रयानं विगतावसानं श्रीरामचन्द्रं सततं नमामि !! 5

श्यामाभिरामं नयनाभिरामं गुणाभिरामं वचनाभिरामम् !

विश्वप्रणामं कृतभक्तिकामं श्रीरामचन्द्रं सततं नमामि !! 6

लीलाशरीरं रणरङ्गधीरं विश्वैकसारं रघुवंशहारम् !

गम्भीरनादं जितसर्ववादं श्रीरामचन्द्रं सततं नमामि !! 7

खलेकृतान्तं स्वजने विनीतं सामोपगीतं मनसा प्रतीतम् !

रागेण गीतं वचनादतीतं श्रीरामचन्द्रं सततं नमामि !! 8

!! इति श्रीशिवप्रोक्तं रामाष्टकम् संपूर्णम् !!

!! श्रीमीनाक्षीस्तोत्रम् !!

श्रीविद्ये शिववामभागनिलये श्रीराजराजार्चिते

श्रीनाथादि गुरुस्वरूपविभवे चिन्तामणीपीठिके !

श्रीवाणी गिरिजानुताङ्घ्रिकमले श्रीशाम्भवि श्रीशिवे

मध्यान्हे मलयध्वजाधिपसुते मां पाहि मीनाम्बिके !! 1

चक्रस्थेऽ चपले चराचरजगन्नाथे जगत्पूजिते

आर्तालीवरदे नताभयकरे वक्षोजभारान्विते !

विद्ये वेदकलापमौलिविदिते विद्युल्लताविग्रहे

मातः पूर्णसुधारसार्द्रहृदये मां पाहि मीनाम्बिके !! 2

कोटीराङ्गदरत्नकुण्डलधरे कोदण्डबाणाञ्चिते

कोकाकारकुचद्वयो परिलसत्प्रालम्ब हाराञ्चिते !

शिन्जन्नूपुर पादसार समणी श्रीपादुकालङ्कृते

मद्दारिद्र्य भुजङ्ग गारुडखगे मां पाहि मीनाम्बिके !! 3

ब्रह्मेशाच्युत गीयमानचरिते प्रेतासनान्तःस्थिते

पाशोदङ्कुश चापबाणकलिते बालेन्दुचूडाञ्चिते !

बाले बालकुरङ्ग लोलनयने बालार्ककोट्युज्ज्वले

मुद्राराधितदेवते मुनिसुते मां पाहि मीनाम्बिके !! 4

गन्धर्वामरयक्षपन्नगनुते गङ्गाधरालिङ्गिते

गायत्रीगरुडासने कमलजे सुश्यामले सुस्थिते !

खातीते खलदारुपावकशिखे खद्योतकोट्युज्ज्वले

मन्त्राराधितदेवते मुनिसुते मां पाहि मीनाम्बिके !! 5

नादे नारदतुम्बुराद्यविनुते नादान्त नादात्मिके

नित्ये नीललतात्मिके निरुपमे नीवारशूकोपमे !

कान्ते कामकाले कदम्बनिलये कामेश्वराङ्कस्थिते

मद्विद्ये मदभीष्टकल्पलतिके मां पाहि मीनाम्बिके !! 6

वीणानाद निमीलितार्धनयने विस्रस्तचूलिभरे

ताम्बूलारुणपल्लवाधरयुते ताटङ्कहारान्विते !

श्यामे चन्द्रकलावतंसकलिते कस्तूरिकाफालिके

पूर्णे पूर्णकलाभि रामवदने मां पाहि मीनाम्बिके !! 7

शब्दब्रह्ममयी चराचरमयी ज्योतिर्मयी वाङ्मयी

नित्यानन्दमयी निरञ्जनमयी तत्वंमयी चिन्मयी !

तत्वातीतमयी परात्परमयी मायामयी श्रीमयी

सर्वैश्वर्यमयी सदाशिवमयी मां पाहि मीनाम्बिके !! 8

!! इति श्रीमीनाक्षीस्तोत्रम् संपूर्णम् !!

!! श्रीशङ्कराचार्य विरचितं श्रीकनकधारास्तोत्रम् !!

अङ्गं हरेः पुलकभूषणमाश्रयन्ति भृङ्गाङ्गनेव मुकुलाभरणंतमालम् !
अङ्गीकृताखिल विभूतिरपाङ्गलीला माङ्गल्यदाऽस्तु मम मङ्गलदेवतायाः !! 1

मुग्धा मुहुर्विदधती वदने मुरारे प्रेमत्रपाप्रणिहितानि गतागतानि !
मालादृशोर्मधुकरीव महोत्पले या सा मे श्रियं दिशतु सागरसंभवायाः !! 2

आमीलिताक्ष मधिगम्य मुदा मुकुन्दं आनन्दकन्दमनिमेषमनङ्ग तन्त्रम् !
आकेकरस्थितकनीनिकपक्ष्मनेत्रं भूत्यै भवेन्मम भुजङ्ग शयाङ्गनायाः !! 3

बाह्वन्तरे मधुजितः श्रितकौस्तुभे या हारावलीव हरिनीलमयी विभाति !
कामप्रदा भगवतोऽ पि कटाक्षमाला कल्याणमावहतु मे कमलालयायाः !! 4

कालाम्बुदालि ललितोरसि कैटभारेः धाराधरे स्फुरति या तडिदङ्गनेव !
मातुः समस्तजगतां महनीयमूर्तिः भद्राणि मे दिशतु भार्गवनन्दनायाः !! 5

प्राप्तं पदं प्रथमतः खलु यत्प्रभावात् माङ्गल्यभाजि मधुमाथिनि मन्मथेन !
मय्यापतेत् तदिह मन्थर मीक्षाणार्धं मन्दालसं च मकरालय कन्यकायाः !! 6

विश्वामरेन्द्र पदविभ्रमदानदक्षं आनन्दहेतुरधिकं मुरविद्विषोऽ पि !
ईषन्निषीदतु मयि क्षणमीक्षणार्द्धं इन्दीवरसहोदरमिन्दिरायाः !! 7

इष्टा विशिष्टमतयोऽ पि यया दयार्द्र दृष्ट्या त्रिविष्टपपदं सुलभं लभन्ते !
दृष्टिः प्रहृष्टकमलोदर दीप्तिरिष्टां पुष्टिं कृषीष्ट मम पुष्कर विष्टरायाः !! 8

दद्याद्दयानुपवनो द्रविणाम्बुधारां अस्मिन्न किञ्चन विहङ्ग शिशौ विषण्णे !
दुष्कर्मघर्ममपनीय चिराय दूरं नारायणप्रणयनी नयनाम्बुवाहः !! 9

गीर्देवतेति गरुडध्वज सुन्दरीति शाकम्भरीति शशिशेखर वल्लभेति !
सृष्टिस्थितिप्रलय केलिषु संस्थितायै तस्यै नमस्त्रिभुवनैक गुरोस्तरुण्यै !! 10

श्रुत्यै नमोऽ स्तु शुभकर्म फलप्रसूत्यै रत्यै नमोऽ स्तु रमणीय गुणार्णवायै !
शक्त्यै नमोऽ स्तु शतपत्र निकेतनायै पुष्ट्यै नमोऽ स्तु पुरुषोत्तम वल्लभायै !! 11

नमोऽ स्तु नालीकनिभाननायै नमोऽ स्तु दुग्धोदधि जन्मभूम्यै !
नमोऽ स्तु सोमामृत सोदरायै नमोऽ स्तु नारायण वल्लभायै !! 12

नमोऽ स्तु हेमाम्बुज पीठिकायै नमोऽ स्तु भूमण्डल नायिकायै !
नमोऽ स्तु देवादि दयापरायै नमोऽ स्तु शार्ङ्गायुध वल्लभायै !! 13

नमोऽ स्तु देव्यै भृगुनन्दनायै नमोऽ स्तु विष्णोरुरसि स्थितायै !
नमोऽ स्तु लक्ष्म्यै कमलालयायै नमोऽ स्तु दामोदर वल्लभायै !! 14

नमोऽ स्तु कान्त्यै कमलेक्षणायै नमोऽ स्तु भूत्यै भुवनप्रसूत्यै !
नमोऽ स्तु देवादिभिरर्चितायै नमोऽ स्तु नन्दात्मज वल्लभायै !! 15

संपत्कराणि सकलेन्द्रिय नन्दनानि साम्राज्य विभवानि सरोरुहाक्षि !
तवद्वन्दनानि दुरिता हरणोद्यतानि मामेव मातरनिशं कलयन्तु मान्ये !! 16

यत्कटाक्ष समुपासनाविधिः सेवकस्य सकलार्थ संपदः !
संतनोति वचनाङ्गमानसैः त्वां मुरारि हृदयेश्वरीं भजे !! 17

सरसिजनिलये सरोजहस्ते धवलतमांशुक गन्धमाल्य शोभे !
भगवति हरिवल्लभे मनोज्ञे त्रिभुवन भूतिकरि प्रसीदमह्यम् !! 18

दिग्घस्तिभिः कनककुंभ मुखावसृष्ट स्वर्वाहिनि विमलचारु जलाप्लुताङ्गीम् !
प्रातर्नमामि जगतां जननीमशेष लोकाधिनाथ गृहिणीं अमृताब्धिपुत्रीम् !! 19

कमले कमलायताक्ष वल्लभे त्वं करुणापूर तरङ्गितैरपाङ्गैः !
अवलोकय मां अकिञ्चनानां प्रथमं पात्रमकृत्रिमं दयायाः !! 20

स्तुवन्ति ये स्तुतिभिरमीभिरन्वहं त्रयीमयीं त्रिभुवन मातरं रमाम् !
गुणाधिका गुरुतर भाग्य भागिनो भवन्ति ते भुवि बुधभाविताशयाः !! 21

!! इति श्रीकनकधारास्तोत्रम् संपूर्णम् !!

!! अवतारत्रयस्तोत्रम् !!

पालयस्व निपालयस्व निपालयस्व रमापते !

वादिराज मुनींद्र वन्दित वाजिवक्त्र नमोऽ स्तु ते !! (प )

मध्वहृत्कमलस्थितं वरदायकं करुणाकरं

लक्ष्मणाग्रजमक्षयं दुरितक्षयं कमलेक्षणम् !

रावणान्तकमव्ययं वरजानकीरमणं विभुं

अञ्जनासुतपाणिकंज निषेवितं प्रणमाम्यहम् !! 1 (पालयस्व)

देवकीतनयं निजार्जुनसारथिं गरुडध्वजं

पूतनाशकटासुरादि खलान्तकं पुरुषोत्तमम् !

दुष्टकंसनिमर्दनं वररुग्मिणिपतिमच्युतं

भीमसेनकरांबुजेन सुसेवितं प्रणमाम्यहम् !! 2 (पालयस्व)

ज्ञानमुक्तिसुभक्तिदं वरबादरायणमव्ययं

कोटिभास्करभासमान किरीटकुण्डलमंडितम् !

वाक्सुदर्शनतः कले शिरघातकं रमयायुतं

मध्वसत्करकंजपूजितमक्षयं प्रणमाम्यहम् !! 3 (पालयस्व)

!! इति श्रीवादिराजपूज्यचरणविरचितं

अवतारत्रयस्तोत्रम् !!

(ஸ்ரீ க்ருஷ்ணாஷ்டகம் "பாலயாச்யுத" மெட்டு)

!! श्रीआञ्जनेयकृतं श्रीसीतारामस्तोत्रम् !!

अयोध्यापुरनेतारं मिथिलापुरनायिकाम् !

राघवाणां अलङ्कारं वैदेहानां अलङ्क्रियाम् !! 1

रघूणां कुलदीपं च निमीनां कुलदीपिकाम् !

सूर्यवंशसमुद्भूतं सोमवंशसमुद्भवाम् !! 2

पुत्रं दशरथस्याद्यं पुत्रीं जनकभूपतेः !

वसिष्ठानुमदाचारं शतानन्त मदानुगाम् !! 3

कौसल्या गर्भसंभूतं वेदिगर्भोदितां स्व्यम् !

पुण्डरीकविशालाक्षं स्फुरदिन्दीवरेक्षणाम् !! 4

चन्द्रकान्ताननांभोजं चन्द्रबिम्बोपमाननाम् !

मत्तमातङ्गगमनं मत्तहंसवधूगताम् !! 5

चन्द्रनार्द्र भुजामध्यं कुंक्रु मार्द्रभुजस्थलीम् !

चापालङ्कृतहस्ताब्जं पद्मालङ्कृतपाणिकाम् !! 6

शरणागतगोप्तारं प्रणिपातप्रसादिकाम् !

कालमेघनिभं रामं कार्तस्वरसमप्रभाम् !! 7

दिव्यसिंहासनासीनं दिव्यस्रग् वस्त्रभूषणाम् !

अनुक्षणं कटाक्षाभ्यां अन्योन्ये क्षणकाङ्क्षिणौ !! 8

अन्योन्यः दृशाकारौ त्रैलोक्य गृह दम्पती !

इमौ युवां प्रणंयाहं भजाम्यद्य कृतार्थताम् !! 9

अनेन स्तौति यः स्तुत्यं रामं सीतां च भक्तिदः !

तस्य तौ दनुतां पुण्याः संपदस्सकलार्थदाः !! 10

एवं श्रीरामचन्द्रस्य जानक्याश्च विशेषतः !

कृतं हनुमतापुण्यं स्तोत्रं सद्यो विमुक्तिदम् !! 11

यः पठेत् प्रातरुत्थाय सर्वान् कामानवाप्नुयात् !!12!!

!!इति श्रीआञ्जनेयकृतं श्रीसीतारामस्तोत्रं संपूर्णम् !!

!! श्रीषोडशबाहु नृसिम्हाष्टकम् !!

भूखण्डं वारणाण्डं परवरविरटं डंपडंपोरूडंपं
डिंडिंडिंडिं डिडिंबं दहमपि दहमैः झंपझंपैश्चझंपैः !
तुल्यास्तुल्यास्तु तुल्याः धूमधूमधुमकैः कुङ्कुमाङ्कैः कुमाङ्कैः
एतत्ते पूर्णयुक्तं अहरहकरहः पातु मां नारसिंहः !! 1

भूभृद्भूभृद्भुजङ्गं प्रलयरववरं प्रज्वलद्ज्वालमालं
खर्जर्जं खर्जदुर्जं खिखचखचखचित्खर्जदुर्जर्जयन्तम् !
भूभागं भोगभागं गगगगगगनं गर्दमर्त्युग्रगण्डं
स्वच्छं पुच्छं स्वगच्छं स्वजनजननुतः पातु मां नारसिंहः 2

एनाभ्रं गर्जमानं लघुलघुमकरो बालचन्द्रार्कदंष्ट्रो
हेमांभोजं सरोजं जटजटजटिलो जाड्यमानस्तु भीतिः!
दन्तानां बाधमानां खगटखगटवो भोजजानुस्सुरेन्द्रो
निष्प्रत्यूहं स राजा गहगहगहतः पातु मां नारसिंहः 3

शङ्खं चक्रं च चापं परशुमशमिषुं शूलपाशाङ्कुशास्त्रं
बिभ्रन्तं वज्रखेटं हलमुसलगदा कुन्तमत्युग्र दंष्ट्रम् !
ज्वालाकेशं त्रिणेत्रं ज्वलदनलनिभं हारकेयूरभूषं
वन्दे प्रत्येकरूपं परपदनिवसः पातु मां नारसिंहः 4

पादद्वन्द्वं धरित्री कटिविपुलतरो मेरुमध्यूढमूरुं
नाभिं ब्रह्माण्डसिन्धुः हृदयमपि भवो भूतविद्वत्समेतः !
दुश्चक्राङ्कं स्वबाहुं कुलिशनखमुखं चन्द्रसूर्याग्निनेत्रं
वक्त्रं वन्हिस्सुविद्युत्सुरगणविजयः पातु मां नारसिंहः !! 5

नासाग्रं पीनगण्डं परबलमथनं बद्धकेयूरहारं
रौद्रं दंष्ट्राकरालं अमितगुणगणं कोटिसूर्याग्निनेत्रम् !
गाम्भीर्यं पिङ्गालाक्षं भ्रूकुटितविमुखं षोडशार्धार्धबाहुं
वन्दे भीमाट्टहासं त्रिभुवनविजयः पातु मां नारसिंहः !! 6

के के नृसिंहाष्टके नरवरसदृशं देवभीत्वं गृहीत्वा
देवन्द्यो विप्रदन्दं प्रतिवचनपया याम्यनप्रत्यनैषीः !
शापं चापं च खड्गं प्रहसितवदनं चक्र चक्री चकेन

ओमित्ये दैत्यनादं प्रकच विविदुषा पातु मां नारसिंहः !! 7

झंझंझंझं झकारं झष झष झषितं जानुदेशं झकारं
हुंहुंहुंहुं हकारं हरित कहहसा यं दिशे वं वकारम् !
वंवंवंवं वकारं वदनदलिततं वामपक्षं सुपक्षं
लंलंलंलं लकारं लघुवणविजयः पातु मां नारसिंहः !! 8

भूतप्रेतपिशाचयक्षगणशः देशान्तरोच्चाटना
चोरव्याधि महज्ज्वरं भयहरं शत्रुक्षयं निश्चयम् !
संध्याकाले जपतमष्टकमिदं सद्भक्ति पूर्वादिभिः
प्रह्लादेव वरो वरस्तु जयिता सत्पूजितां भूतये !! 9

!! इति श्रीषोडशबाहुनृसिंहाष्टकं संपूर्णम् !!

!! श्री वादिराजयतिकृतं दुर्गास्तवः !!

सन्नद्धसिंहस्कन्धस्तां स्वर्णवर्णां मनोरमाम् !
पूर्णेन्दुवदनां दुर्गां वर्णयामि गुणार्णवाम् !! 1

किरीटहारग्रैव नूपुराङ्गदकंकणैः !
रत्नकांच्या रत्नचित्र कुचकञ्चुकतेजसा !! 2

विराजमाना रुचिरांबरा किंकिणिमंडिता !
रत्नमेखलया रत्नवासोपरि विभूषिता !! 3

वीरशृंखलया शोभिचारुपादसरोरुहा !
रत्नचित्रांगुलीमुद्रा रत्नकुण्डलमंडिता !! 4

विचित्रचूडामणिना रत्नोद्यत्तिलकेन च !
अनर्घ्यनासामणिना शोभिताऽऽस्यसरोरुहा !! 5

भुजकीर्त्या रत्नचित्र कण्ठसूत्रेण चांकिता !
पद्माक्षिणी सुबिम्बोष्ठी पद्मगर्भादिभिः स्तुता !! 6

कबरीभारविन्यस्त पुष्पस्तबकविस्तरा !
कर्णनीलोत्पलरुचा लसद् भ्रूमण्डलत्विषा !! 7

कुंत्तलानां  च संतत्या शोभमाना शुभप्रदा !
तनुमध्या विशालोरःस्थला पृथुनितंबिनी !! 8

चारुदीर्घभुजा कम्बुग्रीवा जंघायुगप्रभा !
असिचर्मगदाशूल धनुर्बाणांकुशादिना !! 9

वराभराभ्यां चक्रेण शङ्केन च लसत्करा !
दंष्ट्राग्रभीषणास्योत्थ हुंकार्दितदानवा !! 10

भयङ्करी सुरारीणां सुराणां अभयंकरी !
मुकुन्दकिंकरी विष्णुभक्तानां मौक्तशङ्करी !! 11

सुरस्स्त्रीकिंकरीभिश्च वृता क्षेमंकरी च नः !
आदौ मुखोद्गीर्णनानाऽऽ म्नाया सर्गकरी पुनः !! 12

निसर्गमुक्ता भक्तानां त्रिवर्गफलदायिनी !
निशुम्भशुम्भ संहर्त्री महिषासुरमर्दिनी !! 13

तामसानां तमः प्राप्त्यै मिथ्याज्ञानप्रवर्तिका !
तमोभिमानिनि पायात् दुर्गा स्वर्गापवर्गदा !! 14

इमं दुर्गास्तवं पुण्यं वादिराजयतिरितम् !
पठन्विजयते शत्रून् मृत्युं दुर्गाणि चोत्तरेत् !! 15

!!इति श्रीमद्वादिराजपूज्यचरण विरचितं
दुर्गास्तवः संपूर्णम् !!

!! श्रीमदनमोहनाष्टकम् !!

जय शङ्खगदाधर नीलकलेवर पीतपटाम्बर देहि पदम् !
जय चन्दचर्तित कुण्डलमण्डित कौस्तुभशोभित देहि पदम् !! 1
जय पङ्कजलोचन मारविमोहन पापविखण्डन देहि पदम् !

जय वेणुनिनादक रासविहारक वङ्किमसुन्दर देहि पदम् !! 2
जय धीरधुरन्दर अद्भुतसुन्दर दैवत सेवित देहि पदम् !
जय विश्वविमोहन मानसमोहन संस्थितकारण देहि पदम् !! 3
जय भक्तजनाश्रय नित्यसुखालय अन्तिमबान्धव देहि पदम् !
जय दुर्जननाशन केलिपरायण कालियमर्दन देहि पदम् !! 4
जय नित्यनिरामय दीनदयामय चिन्मय माधव देहि पदम् !
जय पामरपावन धर्मपरायण दानवसूदन देहि पदम् !! 5
जय वेदविदांवर गोपवधूप्रिय वृन्दावनधन देहि पदम् !
जय सत्यसनातन दुर्गतिभञ्जन सज्जनरञ्जन देहि पदम् !! 6
जय सेवकवत्सल करुणासागर वाञ्छितपूरक देहि पदम् !
जय पूतधरातल देवपरात्पर सत्वगुणाकर देहि पदम् !! 7
जय गोकुलभूषण कंसनिषूदन सात्वतजीवन देहि पदम् !
जय योगपरायण संसृतिवारण ब्रह्मनिरञ्जन देहि पदम् !! 8

!! इति श्रीमदनमोहनाष्टकम् समाप्तम् !!

!! श्रीमद्रामायणे सुन्दरकाण्डे
श्री आञ्जनेय नवरत्नमाला स्तोत्रम् !!

माणिक्यम्
ततो रावणनीतायाः सीतायाः शत्रुकर्शनः !
इयेष पदमन्वेष्टुं चारणाचरिते पथि !!
मुत्यम्
यस्य त्वेतानि चत्वारि वानरेन्द्र यथा तव !
स्मृतिर्मतिर्धृतिर्दाक्ष्यं स कर्मसु न सीदति !! 2

प्रवालम्
अनिर्वेदः श्रियो मूलं अनिर्वेदः परम् सुखम् !
अनिर्वेदोहि सततं सर्वार्थेषु प्रवर्तकः !! 3

मरकतम्

नमोऽस्तु रामाय सलक्ष्मणाय देव्यै च तस्यै जनकात्मजायै !

नमोऽ स्तु रुद्रेन्द्रयमानिलेभ्यः नमोऽ स्तु चन्द्रार्कमरुद्गणेभ्यः ! ! 4

पुष्परागम्

प्रियान्नसंभवेद्दुःखं अप्रियादधिकं भयम् !
ताभ्यां हि ये वियुज्यन्ते नमस्तेषां महात्मनाम् !! 5

हीरकम्

रामः कमलपत्राक्षः सर्वसत्व मनोहरः !
रूपदाक्षिण्यसंपन्नः प्रसूतो जनकात्मजे !! 6

इन्द्रनीलम्

जयत्यति बलो रामो लक्ष्मणश्च महाबलः !
दासोऽ हं कोसलेन्द्रस्य रामस्याक्लिष्टकर्मणः !! 7

गोमेदकम्

यद्यस्ति पतिशुश्रूषा यद्यस्ति चरितं तपः !
यदि वास्त्येकपत्नीत्वं शीतो भव हनूमतः !! 8

वैडूर्यम्

निवृत्तवनवासं तं त्वया सार्धमरिन्दमम् !
अभिषिक्तमयोध्यायां क्षिप्रं द्रक्ष्यसि राघवम् !! 9

!! इति श्रीआञ्जनेय नवरत्नमाला स्तोत्रं समाप्तम् !!

!! विभीषणकृत श्री आपदुद्धारण हनूमत्स्तोत्रम् !!

अस्य श्रीआपदुद्धारण हनूमत्स्तोत्र महामन्त्रस्य !
विभीषण ऋषिः ! आपदुद्धारणो हनूमान् देवता !
आपदुद्धारण हनूमत्प्रसाद सिद्ध्यर्थे जपे विनियोगः !!

वामे करे वैरैभीतं वहन्तं शैलं परे शृङ्खलहारिटङ्कम् !
दधान मच्छच्छवियज्ञसूत्रं भजे ज्वलत्कुण्डलमाञ्जनेयम् !! 1

सुपीतकौपीन मुदञ्चिताङ्गुलिं समुज्वलन् मौञ्ज्यजिनोपवितिनम् !
सकुण्डलं लम्ब शिखासमावृतं तं आञ्जनेयं शरणं प्रपद्ये !! 2

आपन्नखिललोकार्तिहारिणे श्रीहनूमते !
अक्स्मादागतोत्पात नाशनाय नमोऽस्तु ते !! 3

सीतावियुक्त श्रीराम शोकदुःखभयापह !
तापत्रितयसंहारिन् आञ्जनेय नमोऽस्तु ते !! 4

आदिव्याधि महामारी ग्रहपीडापहारिणे !
प्राणापहर्त्रे दैत्यानां रामप्राणात्मने नमः !! 5

संसारसागरावर्त कर्तव्यभ्रान्त चेतसाम् !
शरणागतमर्त्यानां शरण्याय नमोऽस्तु ते !! 6

राजद्वारि बिलद्वारि प्रवेशे भूतसङ्कुले !
गजसिंहमहाव्याघ्र चोरभीषणकानने !! 7

शरणाय शरण्याय वातात्मज नमोऽस्तु ते !
नमः प्लवङ्गसैन्यानां प्राणभूतात्मने नमः !! 8

रामेष्ठं करुणापूर्णं हनूमन्तं भयापहम् !
शत्रुनाशकरं भीमं सर्वाभीष्टफलप्रदम् !! 9

प्रदोषे वा प्रभाते वा ये स्मरन्त्यञ्जनासुतम् !
अर्थसिद्धिं यशः कीर्तिं प्राप्नुवन्ति न संशयः !! 10

कारागृहे प्रयाणे च सङ्ग्रामे देशविप्लवे !
ये स्मरन्ति हनूमन्तं तेषां नास्ति विपत्तदा !! 11

वज्रदेहाय कालाग्निरुद्रायामिततेजसे !
ब्रह्मास्त्रस्तंभनायास्मै नमः श्रीरुद्रमूर्तये !! 12

जप्त्वा स्तोत्रमिदं मन्त्रं प्रतिवारं पठेन्नरः !
राजस्थाने सभास्थाने प्राप्तवाते जपेद्ध्रुवम् !! 13

विभीषणकृतं स्तोत्रं यः पठेत् प्रयतो नरः !
सर्वापद्भ्यो विमुच्येत नात्र कार्या विचारणा !! 14

मर्कटेश महोत्साह सर्वशोक विनाशन !
शत्रून संहर मां रक्ष श्रियं दासांश्च देहि मे !! 15

!! इति श्रीआपदुद्धारण हनूमत्स्तोत्रं संपूर्णम् !!

!! श्री चक्रराज मङ्गलम् !!

मङ्गलं चक्रराजाय महनीय गुणाब्धये !
पद्मनाभकराम्भोज परिष्काराय मङ्गलम् !! 1

काशी विप्लोशकाराय कल्याणगुणशालिने !
मालिप्रमथनायास्तु महाधीराय मङ्गलम् !! 2

गजेन्द्रार्तिहरायास्तु ग्राहद्वेधात्वकारिणे !
दिनाधीश तिरोधानकर्त्रे दीप्ताय मङ्गलम् !! 3

चित्राकार स्वचाराय चित्तनिर्वृत्तिकारिणे !
नरकासुरसंहर्त्रे नानारूपाय मङ्गलम् !! 4

चण्डास्त्रांचित दोर्दण्ड खण्डितामर शत्रवे !
चामीकर निभाङ्गाय चारु नेत्राय मङ्गलम् !! 5

चैद्यासुर शिरोहर्त्रे चन्द्राहार्दकराय च !
श्रीमते चक्रराजाय श्रितार्तिघ्नाय मङ्गलम् !! 6

!! इति श्रीचक्रराजमङ्गलं संपूर्णम् !!